# सङ्कलनात्मकमूल्याङ्कनम्-I, 2016
## संस्कृतम्

**अवधि : होरात्रयम्** **षष्ठी** **पूर्णाङ्काः - शतम्**

**Date : 15.09.2016**

**निर्देशाः -**

१. सर्वे प्रश्नाः समाधेयाः ।
२. प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।
३. उत्तराणि संस्कृतेन एव लेखनीयानि ।

## खण्डः 'क' (पठितावबोधनम् - 50 अङ्काः)

**प्र.1 अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

एषः समुद्रतटः । अत्र जनाः पर्यटनाय आगच्छन्ति । केचन तरङ्गैः क्रीडन्ति । केचन च नौकाभिः जलविहारं कुर्वन्ति । तेषु केचन कन्दुकेन क्रीडन्ति । बालिकाः बालकाः च बालुकाभिः बालुकागृहं रचयन्ति । मध्ये-मध्ये तरङ्गाः बालुकागृहं प्रवाहयन्ति । एषा क्रीडा प्रचलति एव । समुद्रतटाः न केवलं पर्यटन-स्थानानि । अत्र मत्स्यजीविनः अपि स्वजीविकां चालयन्ति ।

**प्रश्नाः -** **(2×5=10)**

क) अत्र जनाः किमर्थम् आगच्छन्ति ?
ख) जनाः नौकाभिः किम् कुर्वन्ति ?
ग) बालुकागृहम् के रचयन्ति ?
घ) अत्र के स्वजीविकां चालयन्ति ?
ङ) तेषु केचन केन क्रीडन्ति ?

**प्र.2 अधोलिखितानां प्रश्नानामुत्तराणि लिखत -** **(2×5=10)**

क) जनाः काभिः जलविहारं कुर्वन्ति ?
ख) शृगालस्य मित्रं कः आसीत् ?
ग) वृक्षाः किं रचयन्ति ?
घ) कौतुकेन वृक्षाः किं पश्यन्ति ?
ङ) बालकाः बालुकाभिः किं रचयन्ति ?

**प्र.3 निर्देशानुसारं वचनपरिवर्तनं कुरुत -** **(1×5=5)**

क) अहम् नृत्यामि । (बहुवचने)
ख) एतत् पतति । (बहुवचने)
ग) अस्माकम् पुस्तकानि । (एकवचने)
घ) एते पर्णे स्तः । (बहुवचने)
ङ) नरिकेलं पतति । (द्विवचने)

**प्र.4 मञ्जूषातः कर्तृपदं चित्वा रिक्तस्थानानि पूरयत -** **(1×5=5)**

**मञ्जूषा - मयूराः, गायकः, पुष्पमालाः, सिंहाः, बालकौ ।**

क) ...................... सन्ति ।
ख) ...................... गायति ।
ग) ...................... गर्जन्ति ।
घ) ...................... पठतः ।
ङ) ...................... नृत्यन्ति ।

**प्र.5 मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत -** **(1×5=5)**

**मञ्जूषा - पश्यन्ति, विहरतः, धावति, पठतः, फलन्ति ।**

क) वृक्षाः ................. ।

ख) चटके ................. ।

ग) अश्वः ................. ।

घ) बालिके ................. ।

ङ) जनाः ................. ।

**प्र.6 कोष्ठकस्थ पदेषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत -** **(1×5=5)**

क) अहं ................. खादामि । (रोटिका)

ख) वृक्षाः ................. पिबन्ति । (पवन)

ग) त्वं ................. पिबसि । (जल)

घ) तडागः ................. विभाति । (कमल)

ङ) अहमपि ................. खेलामि । (कन्दुक)

**प्र.7 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -** **(1×5=5)**

**मञ्जूषा - अस्माकम्, पर्यटनाय, सदा, क्रीडा, प्रायद्वीपः ।**

क) ................. सत्यं वद ।

ख) भारतदेशः ................. कथ्यते ।

ग) बालेभ्यः ................. रोचते ।

घ) भारतम् ................. देशः ।

ङ) जनाः समुद्रतटं ................. आगच्छन्ति ।

**प्र.8 कोष्ठकात् पदानि चित्वा रिक्तस्थानानि पूरयत -** **(1×5=5)**

क) ................. पठामि । ( अहम् / गृहम्)

ख) बालः ................. विद्यालयं गच्छति । ( पठनाय / निर्धनम्)

ग) ................. गच्छथः । ( पठन्ति / युवाम्)

घ) ................. क्रीडनकानि ।( युष्माकम् / राम)

ङ) ................. नमः । ( फलम् / शिक्षकाय)

## खण्डः 'ख' (अनुप्रयुक्तव्याकरणम् - 25 अङ्काः)

**प्र.9 क) अधोलिखितानां वर्णानां संयोगं कृत्वा शब्दरचनां कुरुत -** **(1×3=3)**

अ) प् + उ + स् + त् + अ + क् + अ + म् =

क) पुस्तकम्  ख) पोस्तकम्  ग) पष्तकम्

ब) न् + आ + र् + ई =

क) नाशी  ख) नारी  ग) नोरी

स) छ् + आ + त् + र् + आ =

क) छात्रा  ख) छोत्रु  ग) छागः

**ख) पदानां वर्णविच्छेदं प्रदर्शयत -** **(1×2=2)**

अ) बालकः - ब्+....+ल्+अ+क्+अः  ब) फलम् - फ्+अ+....+अ+म्

**प्र.10 अधोलिखितेषु शब्दरूपेषु उचितरूपैः रिक्तस्थानपूर्तिम् कुरुत -** **(1×5=5)**

**मञ्जूषा - फलाभ्याम्, रमे, पुस्तकात्, लताभ्यः, बालकान् ।**

| **विभक्ति** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | रमा | 1) ________ | रमाः |
| द्वितीया | बालकम् | बालकौ | 2) ________ |
| तृतीया | फलेन | 3) ________ | **फलैः** |
| चतुर्थी | लतायै | लताभ्याम् | 4) ________ |
| पंचमी | 5) ________ | पुस्तकाभ्याम् | पुस्तकेभ्यः |
| षष्ठी | वानरस्य | वानरयोः | वानराणाम् |

**प्र.11 अधोलिखितेषु धातुरूपेषु उचितरूपैः रिक्तस्थानपूर्तिम् कुरुत -** **(1×5=5)**

**मञ्जूषा - पठामः, गच्छन्ति, पठति, गच्छामि, पठथः ।**

**क)**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम पुरुषः - | 1) ________ | पठतः | पठन्ति |
| मध्यम पुरुषः - | पठसि | 2) ________ | पठथ |
| उत्तम पुरुषः - | पठामि | पठावः | 3) ________ |

**ख)**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम पुरुषः - | गच्छति | गच्छतः | 4) ________ |
| मध्यम पुरुषः - | गच्छसि | गच्छथः | गच्छथ |
| उत्तम पुरुषः - | 5) ________ | गच्छावः | गच्छामः |

**प.12 अधोलिखितवाक्यानि मञ्जूषातः अव्ययपदानि चित्वा पूरयत -** **(1×5=5)**

**मञ्जूषा - यदा, तदा, अधुना, यथा, कदा ।**

क) सः ................. गच्छति ?

ख) ................. सा खादति तदा सः पिबति ।

ग) ................. सा पठति ।

घ) यदा बालः हसति ................. जनकः हसति ।

ङ) ................. राजा तथा प्रजा ।

**प्र.13 अधोलिखितानि वाक्यानि शुद्धं कृत्वा लिखत -** **(1×5=5)**

क) सः बालकः तत्र <u>पठसि</u> । (पठति / पठामः)

ख) मीनाः तडागे <u>तरतः</u> । (तरामि / तरन्ति)

ग) यूयम् <u>हसथः</u> । (हसथ / हसेषु)

घ) त्वम् <u>पचति</u> । (पचयो / पचसि)

ड.) तौ न <u>पठन्ति</u> । (पठतः / पठानि)

## खण्डः 'ग' (रचनात्मककार्यम् - 15 अङ्काः)

**प्र.14 अधोलिखितम् वार्तालापं मंजूषातः पदं चित्वा पूरयत -** **(1×5=5)**

**मञ्जूषा - अपि, चलावः, गच्छामि, गच्छसि, एव ।**

निन्हा - अरे चीनु ! त्वम् कुत्र (1) ________ ?

चीनु - अहम् विपणम् (2) ________ ।

निन्हा - अहम् अपि तत्र (3) ________ गच्छामि । सह एव (4) ________।

चीनू - किम् तव भ्राता (5) ________ आगच्छति ?

**प्र.15 चित्रं दृष्ट्वा मंजूषायाः शब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत -** **(2×5=10)**

**मञ्जूषा - एतत्, वनस्य, वानराः, वृक्षाः, वृक्षेषु, सिंहः, मृगः, गर्जति, धावति, वने, चित्रम्, अस्ति ।**



## खण्डः 'घ' (अपठितावबोधनम् - 10 अङ्काः)

**प्र.16 अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -**

दिल्लीनगरे अपि एका जन्तुशाला अस्ति । तत्र पञ्जरे सिंहाः गर्जन्ति । तत्र बहवः मृगाः अपि सन्ति । मृगाः चरन्ति इतः ततः धावन्ति च । तत्र गजाः, भल्लुकाः, चित्रकाः अपि सन्ति । एकः मयूरः नृत्यति। वृक्षे काकः चटकः श्येनः च तिष्ठन्ति । कुक्कुटः विचित्रः वदति । कपोतः शुकः च उलूकम् पश्यतः ।

**I. एकपदेन उत्तरत -** **(1×2=2)**

क) एका जन्तुशाला कुत्र अस्ति ? (वने / दिल्लीनगरे)

ख) विचित्रः कः वदति ? (श्येनः / कुक्कुटः)

**II. एकवाक्येन उत्तरत -** **(2×2=4)**

क) मृगाः किं कुर्वन्ति ?

ख) वृक्षे के तिष्ठन्ति

**III. यथा निर्देशमुत्तरत -** **(1×4=4)**

'क' 'ख' वर्गयोः उचितमेलनम् कुरुत ।

| **भाग 'क'** | **भाग 'ख'** |
|---|---|
| श्येनः | तोता |
| शुकः | मुर्गा |
| कुक्कुटः | उल्लू |
| उलूकम् | बाज़ |